# श्री नारायण हृदयम्

**। ध्यानम् ।**

उद्यादादित्यसंकाशं पीतवासं चतुर्भुजम् ।
शंखचक्रगदापाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ॥ 1

त्रैलोक्याधारचक्रं तदुपरि कमठं तत्र चानंतभोगी
तन्मध्ये भूमिपद्मांकुशशिखरदलं कर्णिकाभूतमेरुम् ।
तत्रत्यं शांतमूर्तिं मणिमयमकुटं कुंडलोद्भासितांगं
लक्ष्मीनारायणाख्यं सरसिजनयनं संततं चिंतयामः ॥ 2

अस्य श्रीनारायणहृदय स्तोत्र महामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, नारायणो देवता, नारायण प्रीत्यर्थे जपे विनियोगः ॥

ओं ॥ नारायणः परं ज्योतिरात्मा नारायणः परः ।
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते ॥ 3

नारायणः परो देवो धाता नारायणः परः ।
नारायणः परो धाता नारायण नमोऽस्तु ते ॥ 4

नारायणः परं धाम ध्यानं नारायणः परः ।
नारायण परो धर्मो नारायण नमोऽस्तु ते ॥ 5

© 2022 Vedam Nadam

नारायणः परो देवो विद्या नारायणः परः ।
विश्वं नारायणः साक्षात् नारायण नमोऽस्तु ते ॥ 6

नारायणाद् विधिर्जातो जातो नारायणाद् भवः ।
जातो नारायणादिंद्रो नारायण नमोऽस्तु ते ॥ 7

रविर्नारायणस्तेजः चंद्रो नारायणो महः ।
वह्निर्नारायणः साक्षात् नारायण नमोऽस्तु ते ॥ 8

नारायण उपास्यः स्याद् गुरुर्नारायणः परः ।
नारायणः परो बोधो नारायण नमोऽस्तु ते ॥ 9

नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखम् ।
हरिर्नारायणः शुद्धिर्नारायण नमोऽस्तु ते ॥ 10

निगमावेदितानन्तकल्याणगुणवारिधे ।
नारायण नमस्तेऽस्तु नरकार्णवतारक ॥ 11

जन्ममृत्युजराव्याधिपारतंत्र्यादिभिः सदा ।
दोषैरस्पृष्टरूपाय नारायण नमोऽस्तु ते ॥ 12

वेदशास्त्रार्थविज्ञान साध्यभक्त्येकगोचर ।
नारायण नमस्तेऽस्तु मामुद्धर भवार्णवात् ॥ 13

© 2022 Vedam Nadam

नित्यानंद महोदार परात्पर जगत्पते ।
नारायण नमस्तेऽस्तु मोक्षसाम्राज्यदायिने ॥ 14

आब्रह्मस्तंबपर्यंतं अखिलात्म महाश्रय ।
सर्वभूतात्म भूतात्मन् नारायण नमोऽस्तु ते ॥ 15

पालिताशेष लोकाय पुण्यश्रवण कीर्तन ।
नारायण नमस्तेऽस्तु प्रलयोदक शायिने ॥ 16

निरस्त सर्वदोषाय भक्त्यादि गुणदायिने ।
नारायण नमस्तेऽस्तु त्वां विना न हि मे गतिः ॥ 17

धर्मार्थकाम मोक्षाख्य पुरुषार्थ प्रदायिने ।
नारायण नमस्तेऽस्तु पुनस्तेऽस्तु नमो नमः ॥ 18

**। अथ प्रार्थना ।**

नारायण त्वमेवासि दहराख्ये हृदि स्थितः ।
प्रेरिता प्रेर्यमाणानां त्वया प्रेरित मानसः ॥ 19

त्वदाज्ञां शिरसा कृत्वा भजामि जन पावनम् ।
नानोपासन मार्गाणां भवकृद् भावबोधकः ॥ 20

© 2022 Vedam Nadam

भावार्थकृद् भवातीतो भव सौख्यप्रदो मम ।
त्वन्मायामोहितं विश्वं त्वयैव परिकल्पितम् ॥ 21

त्वदधिष्ठान मात्रेण सा वै सर्वार्थकारिणी ।
त्वमेव तां पुरस्कृत्य मम कामान् समर्थय ॥ 22

न मे त्वदन्यस्त्रातास्ति त्वदन्यन्न हि दैवतम् ।
त्वदन्यं न हि जानामि पालकं पुण्यवर्धनम् ॥ 23

यावत्सांसारिको भावो मनस्स्थो भावनात्मकः ।
तावत्सिद्धिर्भवेत् साध्या सर्वदा सर्वदा विभो ॥ 24

पापिनामहमेकाग्रो दयाळूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ 25

त्वयाहं नैव सृष्टश्चेत् न स्यात्तव दयाळुता ।
आमयो वा न सृष्टश्चेत् औषधस्य वृथोदयः ॥ 26

पापसंग परिश्रांतः पापात्मा पापरूपधृक् ।
त्वदन्यः कोऽत्र पापेभ्यः त्रातास्ति जगतीतले ॥ 27

त्वमेव माता च पिता त्वमेव त्वमेव बंधुश्च सखा त्वमेव ।
त्वमेव सेव्यश्च गुरुस्त्वमेव त्वमेव सर्वं मम देव देव ॥ 28

© 2022 Vedam Nadam

प्रार्थनादशकं चैव मूलष्टक मतः परम् ।
यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥ 29

नारायणस्य हृदयं सर्वाभीष्ट फलप्रदम् ।
लक्ष्मीहृदयकं स्तोत्रं यदि चैतद्विनाकृतम् ॥ 30

तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीः क्रुध्यति सर्वदा ।
एतत्संकलितं स्तोत्रं सर्वाभीष्ट फलप्रदम् ॥ 31

जपेत् संकलितं कृत्वा सर्वाभीष्टमवाप्नुयात् ।
नारायणस्य हृदयमादौ जप्त्वा ततःपरम् ॥ 32

लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुनः ।
पुनर्नारायणं जप्त्वा पुनर्लक्ष्मीनुतिं जपेत् ॥ 33

तद्वद्धोमाधिकं कुर्यादेतत्संकलितं शुभम् ।
एवं मध्ये द्विवारेण जपेत् संकलितं शुभम् ॥ 34

लक्ष्मीहृदयके स्तोत्रे सर्वमन्यत् प्रकाशितम् ।
सर्वान् कामानवाप्नोति आधिव्याधिभयं हरेत् ॥ 35

गोप्यमेतत् सदा कुर्यात् न सर्वत्र प्रकाशयेत् ।
इति गुह्यतमं शास्त्रं प्रोक्त ब्रह्मादिभिः पुरा ॥ 36

© 2022 Vedam Nadam

लक्ष्मीहृदयप्रोक्तेन विधिना साधयेत् सुधीः ।
तस्मात् सर्वप्रयत्नेन साधयेद् गोपयेत् सुधीः ॥ 37

यत्रैतत्पुस्तकं तिष्ठेत् लक्ष्मीनारायणात्मकम् ।
भूत पैशाच वेताल भयं नैव तु सर्वदा ॥ 38

भृगुवारे तथा रात्रौ पूजयेत् पुस्तकद्वयम् ।
सर्वदा सर्वदा स्तुत्यं गोपयेत् साधयेत् सुधीः ।
गोपनात् साधनाल्लोके धन्यो भवति तत्त्वतः ॥ 39

॥ इत्यथर्वरहस्ये उत्तरभागे नारायण हृदय स्तोत्रं संपूर्णम् ॥